वृत्तरत्नाकरम्

# Vṛttaratnākara

*by*

## Śrī Kedārabhaṭṭa

*edited by*

## Ānandajoti Bhikkhu

*2003/2547*

## Table of Contents (outline)

Preface.....3

प्रथमो ऽध्यायः संज्ञाभिधान...5

द्वितीयो ऽध्यायः मात्रावृत्त.....10

तृतीयो ऽध्यायः समवृत्त.....19

चतुर्थो ऽध्यायः अर्धसमवृत्त.....38

पञ्चमो ऽध्यायः विषमवृत्त.....40

षष्ठो ऽध्यायः प्रस्थारादि.....46

# Preface

## Texts & Abbreviations:

VR = Vṛttaratnākara.

P = Vāsudev Laxmaṇ Shāstrī Paṇśīkar (ed), Vṛittaratnākara of Śrīmat Kedārabhaṭṭa, with the commentary by Nārāyaṇabhaṭṭa (3rd Edition Bombay, 1906). As on the whole this edition seemed to be the most reliable I have made it the basis for the present work.

V = Welivitiye Sri Sorata Thero (ed), Vruththarathnakaraya (1926, reprinted Colombo, 2001). This edition has the text printed in Devanāgari at the front of the book, and this has been used for noting the variants, except where otherwise stated. The Vyākhyā contains a transliteration of the text into Sinhala script, and Ven. Sorata's very useful commentary. There are many additions to the text in the Vyākhyā as explained in the foreword, however there are also many differences in the readings, and some omissions, which have not been explained.

S = Very Rev. C.A. Seelakkhandha Mahā Sthavira (ed), Vrittaratnākara by Pandit Kedārabhatta, with its commentary Vrittaratnākarapancikā by Prof. Srī Rāmacandra Kavi Bhārati (Bombay, 1908).

Dh = Śrī Dharānanda Śāstrī (ed), Śrī Bhaṭṭakedāraviracitam Vṛttaratnākaram (1st printing Delhi, 1972, reprinted 1999); the text as printed at the beginning of the book (pgs xiii - xxiii) has been compared for the variant readings.

## Other works consulted:

ChŚā = Paṇḍit Kedāranāth of Jaypur (ed), Chhandas Śāstra by Śrī Piṃgalanāga, with the commentary Mṛitasañjīvanī by Śrī Halāyudha Bhaṭṭa (3rd edition Bombay, 1938). The most authoritive work on Sanskrit prosody, written as sūtras, rather than as kārikās, as with VR, ChM, SB, Vutt. etc.

ChM = Vāsudev Laxmaṇ Shāstrī Paṇśīkar (ed), Chhandomañjarī of Gaṅgādāsa (Bombay, 1906). Published together with P.

ŚB = Vāsudev Laxmaṇ Shāstrī Paṇśīkar (ed), Śrutabodha of Kālidāsa (Bombay, 1906). Published together with P.

Vutt: Vuttodaya, The Composition of Metre, by Ven. Saṅgharakkhita, Ānandajoti Bhikkhu (ed, 2003). Vuttodaya is an edited translation of Vṛttaratnākara into Pāḷi made by Saṅgharakkhita Mahāsāmi. We can often see from the translation what reading Ven. Saṅgharakkhita had in the manuscripts he was following and this sometimes helps us to reconstruct the text of Vṛttaratnākara, at least so far as it was known in 12th century Śrī Lanka.

# वृत्तरत्नाकरम्

The immediate purpose in preparing this edition of Vṛttaratnākara was to have a text to accompany the edition of Vuttodaya that is currently under preperation. Vuttodaya itself is an edited translation of the Sanskrit work, and we therefore are in an almost unique position of being able to show what the lines looked like in the Sanskrit, together with its Pāḷi translation.

Although in the body of the text the normal sort of variants occur, in the Samavṛtta section (Tṛtīyo ’dhyāyaḥ) in particular the variations are very great. The samavṛtta metres are the main metres used in the Classical period, and it seems everybody felt free to augment the metres listed in this section, so that it is almost impossible to see what the original text must have looked like.

Because of this, in preparing this edition I have tried to err on the side of caution, and have only admitted a kārikā into the text, when it is supported by all the editions consulted. Verse 5 of the present work states that the book will describe 136 metres (only).

As the text stands the Sama-, Ardhasama-, & Viṣamavṛtta sections alone account for 127 metres; and if we count the metres in the Mātrāvṛtta section there are 25 metres. When we compare the present text of Vṛttaratnākara with Chandaḥśāstra & Vuttodaya, we can see that there are some metres in the former text not found in either of the others. Nearly all of these occur in the Samavṛtta section of the text, which is where the main variations occur anyway. If we were to exclude those metres from the text, the number given in verse 5 would in fact be about correct.

I would therefore suggest that all the metres in the Samavṛtta section upto Pāṅkti in Supratiṣṭhā (i.e. vss 65 - 70), are probably additions;[1] and the same applies to the following metres: Śaśivadanā 72; Vasumatī 73; Mauktikamālā 104; Upasthitā 105; Maṇimālā 118; Prabhā 125; Mālanī 126; Elā 144; Candralekhā 145; Narkuṭaka 153. I have therefore placed these metres in brackets in this edition, although nothing definite about their status can be made until someone examines the manuscript evidence and establishes an authorative edition.

In this edition I have adopted certain usages, like normally writing cch in place of ch after short vowels; omitting the doubling of certain akṣara after r, e.g. āryā, in place of āryyā; ardhā, in place of arddhā; prakīrtita, in place of prakīrttita, etc. These variants, which occur in the editions consulted, are merely orthographical, and have therefore not been noted in the variant readings.

Ānandajoti Bhikkhu,
2003/2547

[1] Perhaps added for the sake of completion.

# प्रथमो ऽध्यायः संज्ञाभिधान

*श्री गणेशाय नमः*

⏑⏑−−¦⏑−−−¦¦−−−−¦⏑−⏑−
सुखसन्तानसिद्ध्यर्थंनत्वा ब्रह्माच्युतार्चितम्।
−−⏑−¦⏑−−−¦¦−⏑−−¦⏑−⏑−
गौरीविनायकोपेतंशंकरं लोकशंकरम्॥ १॥

−−⏑−¦⏑−−−¦¦−−−−¦⏑−⏑−
वेदार्थशैवशास्त्रज्ञःपव्येको ऽभूद्विजोत्तमः।
−⏑−−¦⏑−−−¦¦⏑⏑−−¦⏑−⏑−
तस्य पुत्रो ऽस्ति केदारःशिवपादार्चते रतः॥ २॥

−−−⏑¦⏑−−−¦¦−⏑−⏑¦⏑−⏑−
तेनेदं क्रियते चन्दोलक्ष्यलक्षणसंयुतं।
−⏑−−¦⏑−−⏑¦¦−−−⏑¦⏑−⏑−
वृत्तरत्नाकरं नामबालानां सुखसिद्धये॥ ३॥

−⏑−⏑¦⏑−−−¦¦⏑−−−¦⏑−⏑−
पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा।
−−−⏑¦⏑−−−¦¦−−⏑⏑¦⏑−⏑−
मात्रावर्णविभेदेन च्चन्दस्तदिह कथ्यते॥ ४॥

⏑⏑–⏑¦⏑–––¦¦–⏑–⏑¦⏑–⏑–

षडध्यायनिबद्धस्य च्चन्दसो ऽस्य परिस्फुटम्।

⏑–⏑⏑¦⏑–––¦¦––⏑⏑¦⏑–⏑–

प्रमाणमिह विज्ञेयंषड्विंशदधिकं शतम्॥ ५॥

⏑–⏑–¦⏑–––¦¦––⏑⏑¦⏑–⏑–

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः।

⏑–––¦⏑–––¦¦––⏑⏑¦⏑–⏑–

समस्तं वाङ्मयं व्याप्तंत्रैलोक्यमिव विष्णुना॥ ६॥

–⏑––¦⏑–––¦¦⏑––⏑¦⏑–⏑–

सर्वगुर्मौ मुखान्तलौर्यरावन्तगलौ सतौ।

⏑–––¦⏑–––¦¦⏑––⏑¦⏑–⏑–

ग्मध्याद्यौ ज्भौ त्रिलो नो ऽष्टौभवन्त्यत्र गुणास्त्रिकाः॥ ७॥

––––¦⏑––⏑¦¦⏑⏑–⏑¦⏑–⏑–

ज्ञेयाः सर्वान्तमध्यादिगुरवो ऽत्र चतुष्कलाः।

⏑–⏑–¦⏑–––¦¦–––⏑¦⏑–⏑–

गणाश्चतुर्लघूपेताःपञ्चार्यादिषु संस्थिताः॥ ८॥

––––¦⏑–––¦¦–––⏑¦⏑–⏑–

सानुस्वारो विसर्गान्तोदीर्घो युक्तपरश्च यः।

––––¦⏑–––¦¦––––¦⏑–⏑–

वा पादान्ते त्वसौ ग्वक्रोज्ञेयो ऽन्यो मात्रिको लृजुः॥ ९॥

−−−⏑¦⏑−−⏑¦¦−−−⏑¦⏑−⏑−

पादादाविह वर्णस्यसंयोगः क्रमसंज्ञकः।

⏑−⏑−¦⏑−−−¦¦⏑⏑−−¦⏑−⏑−

पुरःस्थितेन तेन स्याल्लघुतापि क्वचिद्गुरोः॥ १०॥

इदमस्योदाहरणं

⏑⏑−¦−⏑⏑¦−−¦¦⏑−⏑¦−−¦⏑−⏑¦⏑⏑−¦−

तरुणं सर्षपशाकं नवोदनं पिच्छिलानि च दधीनि।

−−¦⏑−⏑¦−⏑⏑¦¦−⏑⏑¦−−¦⏑¦−−¦−

अल्पव्ययेन सुन्दरि ग्राम्यजनो मिष्टमश्नाति॥ ११॥

−⏑−⏑¦⏑−−−¦¦−−−−¦⏑−⏑−

अब्धिभूतरसादीनांज्ञेयाः संज्ञास्तु लोकतः।

−−−−¦⏑−−−¦¦⏑−−−¦⏑−⏑−

ज्ञेयः पादश्चतुर्थांशोयतिर्विच्चेदसंज्ञितः॥ १२॥

−⏑−⏑¦⏑−−−¦¦−−−−¦⏑−⏑−

युक्समं विषमं चायुक्स्थानं सद्भिर्निगद्यते।

⏑⏑−⏑¦⏑−−−¦¦⏑⏑−⏑¦⏑−⏑−

सममर्धसमं वृत्तंविषमं च तथापरम्॥ १३॥

−⏑−−¦⏑−−−¦¦−⏑−⏑¦⏑−⏑−

अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः।

−−−−¦⏑−−−¦¦⏑−−−¦⏑−⏑−

तच्चन्दःशास्त्रतत्त्वज्ञाःसमं वृत्तं प्रचक्षते॥ १४॥

⏑⏑–⏑¦⏑––⏑¦¦⏑––⏑¦⏑–⏑–

प्रथमाङ्घ्रिसमो यस्यतृतीयश्चरणो भवेत्।

⏑–––¦⏑––––¦¦⏑–⏑⏑¦⏑–⏑–

द्वितीयस्तुर्यवद्वृत्तंतदर्धसममुच्यते॥ १५॥

⏑––⏑¦⏑––⏑¦¦–⏑––¦⏑–⏑–

यस्य पादचतुष्को ऽपिलक्ष्म भिन्नं परस्परम्।

⏑––⏑¦⏑–––¦¦–––⏑¦⏑–⏑–

तदाहुर्विषमं वृत्तंचन्दःशास्त्रविशारदाः॥ १६॥

––––¦⏑–––¦¦–––⏑¦⏑–⏑–

आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्धितैः।

⏑–––¦⏑–––¦¦––––¦⏑–⏑–

पृथक्छन्दो भवेत्पादैर्यावत्षड्विंशतिं गतम्॥ १७॥

⏑–––¦⏑––⏑¦¦–⏑–⏑¦⏑–⏑–

तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः।

––––¦⏑–––¦¦⏑⏑––¦⏑–⏑–

शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः॥ १८॥

––––¦⏑–––¦¦⏑–––¦⏑–⏑–

उक्तात्युक्ता तथा मध्याप्रतिष्ठान्या सुपूर्विका।

––⏑–⏑¦⏑––⏑¦¦⏑⏑––¦⏑–⏑–

गायत्र्युष्णिगनुष्टुप् चबृहती पङ्क्तिरेव च॥ १९॥

––⏑⏑¦⏑––⏑¦¦⏑–⏑⏑¦⏑–⏑–

त्रिष्टुप् च जगती चैवतथातिजगती मता।

–⏑––¦⏑–––¦¦––––¦⏑–⏑–

शक्करी सातिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृते॥ २०॥

⏑––⏑¦⏑––⏑¦¦⏑–⏑⏑¦⏑–⏑–

धृतिश्चातिधृतिश्चैवकृतिः प्रकृतिराकृतिः।

⏑⏑––¦⏑––⏑¦¦⏑–⏑⏑¦⏑–⏑–

विकृतिः सङ्कृतिश्चैवतथातिकृतिरुत्कृतिः॥ २१॥

––––¦⏑–––¦¦⏑⏑––¦⏑–⏑–

इत्युक्ताश्चन्दसां संज्ञाःक्रमशो वच्मि सांप्रतम्।

–⏑––¦⏑–––¦¦––––¦⏑–⏑–

लक्षणं सर्ववृत्तानांमात्रावृत्तानुपूर्वकम्॥ २२॥

*इति वृत्तरत्नाकराख्ये चन्दसि प्रथमो ऽध्यायः*

# द्वितीयो ऽध्यायः मात्रावृत्त

## आर्या

### आर्या

−−¦−−¦⏑⏑−¦¦−−¦−⏑⏑¦⏑−⏑¦⏑⏑−¦−

लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमे जः।

−−¦−⏑⏑¦−−¦¦⏑⏑−¦−⏑⏑¦⏑¦−−¦−

षष्ठो ऽयं नलघू वा प्रथमे ऽर्धे नियतमार्यायाः॥ २३॥

−−¦⏑−⏑¦−⏑⏑¦−,−¦⏑⏑−¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦−

षष्थे द्वितीयलात्परके ऽन्ले मुखलाच्च सयतिपदनियमः।

⏑⏑−¦−−¦⏑⏑−¦¦−−¦⏑⏑⏑⏑¦⏑¦−−¦−

चरमे ऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः॥ २४॥

### पथ्या

−−¦⏑−⏑¦−−¦¦⏑⏑−¦−−¦⏑−⏑¦−−¦−

त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः।

−−¦⏑−⏑¦−−¦¦⏑−⏑¦−−¦⏑¦−−¦−

पथ्येति नाम तस्याः प्रकीर्तितं नागराजेन॥ २५॥

### विपुला

−−¦⏑⏑−¦⏑⏑−¦⏑−,⏑¦⏑⏑−¦⏑−⏑¦⏑⏑−¦−

उल्लङ्घ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः।

−−¦−−¦⏑⏑−¦−,⏑⏑¦−⏑⏑¦⏑¦−−¦−

यस्यास्तां पिंगलनागो विपुलामिति समाख्याति॥ २६॥

### चपला

⏑⏑–¦⏑–⏑¦––¦¦⏑–⏑¦––¦⏑–⏑¦––¦–

उभयार्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः।

⏑⏑–¦⏑–⏑¦––¦¦⏑–⏑¦––¦⏑¦––¦–

चपलेति नाम तस्याः प्रकीर्तितं नागराजेन॥ २७॥

### मुखचपला

––¦⏑–⏑¦––¦¦⏑–⏑¦–⏑⏑¦⏑–⏑¦––¦–

आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः।

––¦–⏑⏑¦––¦¦⏑⏑⏑⏑¦––¦⏑¦–⏑⏑¦–

शेषे पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना॥ २८॥

### जघनचपला

–⏑⏑¦–⏑⏑¦––¦¦⏑⏑–¦⏑⏑–¦⏑–⏑¦⏑⏑–¦–

प्राक्प्रतिपादितमर्धे प्रथमे प्रथमेतरे तु चपलायाः।

––¦⏑–⏑¦––¦¦⏑–⏑¦––¦⏑¦⏑⏑⏑⏑¦–

लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला॥ २९॥

*इत्यार्याप्रकरणम्*

## गीति

### गीति

––¦⏑⏑⏑⏑¦––¦¦⏑⏑⏑⏑¦⏑⏑–¦⏑–⏑¦–⏑⏑¦–

आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः।

⏑⏑–¦⏑⏑⏑⏑¦––¦¦––¦––¦⏑–⏑¦––¦–

दलयोः कृतयतिशोभां तां गीतिं गीतवान्भुजङ्गेशः॥ ३०॥

### उपगीति

––¦⏑–⏑¦––¦¦–⏑⏑¦––¦⏑¦––¦–

आर्याद्वितीयके ऽर्धे यद्गदितं लक्षणं तत्स्यात्।

–⏑⏑¦–⏑⏑¦⏑⏑–¦⏑⏑–¦––¦⏑¦––¦–

यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते॥ ३१॥

### उद्गीति

––¦⏑⏑–¦⏑⏑–¦¦–⏑⏑¦⏑⏑–¦⏑¦––¦–

आर्याशकलद्वितयं व्यत्ययरचितं भवेद्यस्याः।

––¦–⏑⏑¦⏑⏑–¦¦––¦––¦⏑–⏑¦––¦–

सोद्गीतिः किल गदिता तद्वद्यत्यंशभेदसंयुक्ता॥ ३२॥

### आर्यागीति

––¦––¦–⏑⏑¦¦⏑⏑–¦––¦⏑–⏑¦⏑⏑–¦––

आर्यापूर्वार्धं यदि गुरुणैकेनाधिकेन निधने युक्तम्।

⏑⏑–¦––¦⏑⏑–¦¦⏑–⏑¦–⏑⏑¦⏑–⏑¦––¦––

इतरत्तद्वन्निखिलं दलं यदीयमुदितेयमार्यागीतिः॥ ३३॥

*इति गीतिप्रकरणम्*

## वैतालीय

### वैतालीय

–⏑⏑–¦–⏑–⏑–¦¦–⏑⏑––¦–⏑–⏑–

षड्विषमे ऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः।

⏑⏑–⏑⏑¦–⏑–⏑–¦¦––––¦–⏑–⏑–

न समात्र पराश्रिता कला वैतालीये ऽन्ते रलौ गुरुः॥ ३४॥

### औपच्चन्दसिक

–––¦–⏑–⏑––¦¦–––⏑⏑¦–⏑–⏑––

पर्यन्ते यौँ तथैव शेषम् औपच्चन्दसिकं सुधीभिरुक्तम् ॥ ३५॥

### आपातलिका

––⏑⏑¦–⏑⏑––¦¦–⏑⏑–⏑⏑¦–⏑⏑––

आपातलिका कथिते ऽयं भाद्गुरुकावथ पूर्ववदन्यत्॥ ३६॥

### दक्षिणान्तिका

⏑–⏑–¦–⏑–⏑–¦¦⏑–⏑––¦–⏑–⏑–

तृतीययुग्दक्षिणान्तिका समस्तपादेषु द्वितीयलः॥ ३७॥

### उदिच्यवृत्ति

⏑–⏑–¦–⏑–⏑–¦¦–––⏑⏑¦–⏑–⏑–

उदिच्यवृत्तिर्द्वितीयलः सक्तो ऽग्रेण भवेदयुग्मयोः॥ ३८॥

### प्राच्यवृत्ति

––⏑⏑¦–⏑–⏑–¦¦–⏑–⏑⏑⏑¦–⏑–⏑–

पूर्वेण युतो ऽथ पञ्चमः प्राच्यवृत्तिरुदितेति युग्मयोः॥ ३९॥

### प्रवृत्तक

⏑–⏑–¦–⏑–⏑–¦¦–⏑–⏑⏑⏑¦–⏑–⏑–

यदा समावोजयुग्मकौ पूर्वयोर्भवति तत्प्रवृत्तकम्॥ ४०॥

### अपरान्तिका

–⏑–⏑⏑⏑¦–⏑–⏑–

अस्य युग्मरचितापरान्तिका॥ ४१॥

### चारुहासिनी

⏑–⏑–¦–⏑–⏑–

अयुग्भवा चारुहासिनी॥ ४२॥

*इति वैतालीयप्रकरणम्*

## वक्त्र

### वक्त्र

––––¦⏑–––¦¦––––¦⏑–––

वक्त्रं नाद्यान्नसौ स्यातामब्धेर्यो ऽनुष्टुभि ख्यातम्॥ ४३॥

### पथ्यावक्त्र

⏑––⏑¦⏑–––¦¦––––¦⏑–⏑–

युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितम्॥ ४४॥

### विपरीतवक्त्र

–⏑––¦⏑–⏑–¦¦⏑–⏑⏑¦⏑–––

ओजयोर्जेन वारिधेस्तदेव विपरीतादि॥ ४५॥

### चपलावक्त्र

⏑⏑––¦⏑⏑⏑–¦¦⏑–––¦⏑–––

चपलावक्त्रमयुजोर्नकारश्चेत्पयोराशेः॥ ४६॥

### युग्मविपुला

––––¦⏑–––¦¦––⏑⏑¦⏑–⏑–

यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता॥ ४७॥

### सैतवविपुला

–⏑––¦⏑–⏑–

सैतवस्याखिलेष्वपि ॥ ४८॥

### भविपुला

––⏑–¦–⏑⏑–

भेनाब्धितो भाद्विपुला॥ ४९॥

### रविपुला

–⏑––¦–⏑––

इत्थमन्या रश्चतुर्थात्॥ ५०॥

### नविपुला

–⏑––¦⏑⏑⏑–

नो ऽम्बुधेश्चेन्नविपुला॥ ५१॥

### तविपुला

––––¦––⏑–

तो ऽब्धेस्तत्पूर्वान्या भवेत्॥ ५२॥

*इति वक्रप्रकरणम्*

## मात्रासमक

### अचलधृति

⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑

द्विकगुणितवसुलघुरचलधृतिरिह॥ ५३॥

### मात्रासमक

––¦◡◡–¦◡◡–¦––

मात्रासमकं नवमो ल्गान्तम्॥ ५४॥

### विश्लोक

––¦◡–◡¦––¦––

जो न्लावथाम्बुधेर्विश्लोकः॥ ५५॥

### वानवासिका

–◡◡¦––¦◡–◡¦––

तद्युगलाद्वानवासिका स्यात्॥ ५६॥

### चित्रा

––¦◡◡◡◡¦◡◡–¦––

वाणाष्टनवसु यदि लश्चित्रा॥ ५७॥

### उपचित्रा

–◡◡¦––¦–◡◡¦––

अब्धियुगाद्ल्श्चेदुपचित्रा ॥ ५८॥

### पादाकुलक

◡◡–¦◡◡◡◡¦◡◡–¦◡◡– चित्रा

यदतीतकृतविविधलक्ष्मयुतैः

––¦◡–◡¦––¦◡◡– विश्लोक

मात्रासमादिपादैः कलितम्।

⏑⏑⏑⏑¦–⏑⏑¦⏑–⏑¦⏑⏑– वानवासिका

अनियतवृत्तपरिमाणसहितं

⏑⏑–¦⏑–⏑¦––¦⏑⏑– विश्लोक

प्रथितं जगत्सु पादाकुलकम् ॥ ५९॥

––⏑–¦⏑–––¦¦–––⏑¦⏑–⏑–

वृत्तस्य ला विना वर्णैर्गा वर्णा गुरुभिस्तथा।

⏑⏑––¦⏑–––¦¦⏑–⏑⏑¦⏑–⏑–

गुरवो लैर्दले नित्यंप्रमाणमिति निश्चितम्॥ ६०॥

*इति मात्रासमप्रकरणम्*

## द्विपाद

### शिखा

⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦–

शिखिगुणितदशलघुरचितमपगतलघुयुगलमपरमिदमखिलम्।

⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑–

सगुरु शकलयुगलकमपि सुपरिघटितललितपदवितति भवति शिखा॥ ६१॥

### खञ्जा

⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑–

विनिमयविनिहितशकलयुगलकलितपदविततिविरचितगुणनिचया ।

⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦–

श्रुतिसुखकृदियमपि जगति झि जशिर उपगतवति सति भवति खजा ॥ ६२॥

### अनङ्गक्रीडा

अष्टावर्धे गा द्व्यभ्यस्ता यस्याः सानङ्गक्रीडोक्ता।

⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑

दलमपरमपि वसुगुणितसलिलनिधिलघु कविरचितपदविततति भवति॥ ६३॥

### अतिरुचिरा

⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑¦¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑⏑⏑⏑¦⏑–

त्रिगुणनवलघुरवसितिगुरुरिति दलयुगकृततनुरतिरुचिरा॥ ६४॥

*इति द्विपात्प्रकरणम्*

*इति वृत्तरत्नाकराख्ये चन्दसि सममात्राख्यो द्वितीयो ऽध्यायः*

# तृतीयो ऽध्यायः समवृत्त

## १ उक्ता एकाक्षरा

### श्री

–,

ग्श्रीः ॥ ६५॥

## २ अत्युक्ता द्व्यक्षरा

### स्त्री

– –,

गौ स्त्री॥ ६६॥

## ३ मध्या त्र्यक्षरा

### नारी

– – –,

मो नारी॥ ६७॥

### मृगी

–⏑–,

रो मृगी॥ ६८॥

## ४ प्रतिष्ठा चतुरक्षरा

### कन्या

––––,

म्गौ चेत्कन्या॥ ६९॥

## ५ सुप्रतिष्ठा पञ्चाक्षरा

### पाङ्क्ति

–⏑⏑––,

भ्गौ गिति पाङ्क्तिः॥ ७०॥

## ६ गायत्री षडक्षरा

### तनुमध्या

––⏑⏑––,

त्यौ चेत्तनुमध्या ॥ ७१॥

### शशिवदना

⏑⏑⏑⏑––,

शशिवदना न्यौ॥ ७२॥

### वसुमती

––⏑⏑⏑–,

त्सौ चेद्वसुमती॥ ७३॥

## ७ उष्णिक् सप्ताक्षरा

### मदलेखा

–––⏑⏑––,

म्सौ गः स्यान्मदलेखा॥ ७४॥

## ८ अनुष्टुप् अष्टाक्षरा

### चित्रपदा

–⏑⏑–⏑⏑––,

भौ गिति चित्रपदा गः॥ ७५॥

### विद्युन्माला

––––(,)––––

मो मो गो गो विद्युन्माला॥ ७६॥

### माणवक

–⏑⏑–(,)–⏑⏑–

माणवकं भात्तलगाः॥ ७७॥

### हंसरुत

–––⏑⏑⏑––,

म्नौ गौ हंसरुतमेतत्॥ ७८॥

### समानिका

–⏑–⏑–⏑–⏑,

जौं समानिका गलौ च॥ ७९॥

### प्रमाणिका

⏑–⏑–⏑–⏑–,

प्रमाणिका जरौ लगौ॥ ८०॥

### वितान

⏑–⏑––⏑––,

वितानमाभ्यां यदन्यत्॥ ८१॥

## ९ बृहती नवाक्षरा

### हलमुखी

–⏑–(,)⏑⏑⏑⏑⏑–

रान्नसाविह हलमुखी॥ ८२॥

### भुजगशिशुभृता

⏑⏑⏑⏑⏑⏑–(,)––

भुजगशिशुभृता नौ मः॥ ८३॥

## १० पङ्क्ति दशाक्षरा

### शुद्धविराड्

–––⏑⏑–⏑–⏑–,

म्सौ ज्गौ शुद्धविराडिदं मतम्॥ ८४॥

### पणवम्

–––⏑⏑(,)⏑⏑–––

म्नौ य्गौ चेति पणवनामेदम्॥ ८५॥

### मयूरसारिणी

–⏑–⏑–⏑–⏑––,

जौं रगौ मयूरसारिणी स्यात्॥ ८६॥

### रुक्मवती

–⏑⏑––––⏑⏑––,

भ्मौ सगयुक्तौ रुक्मवतीयम्॥ ८७॥

### मत्ता

––––(,)⏑⏑⏑⏑––

ज्ञेया मत्ता मभसगयुक्ता॥ ८८॥

### मनोरमा

⏑⏑⏑–⏑–⏑–⏑–,

नरजगैर्भवेन्मनोरमा॥ ८९॥

### उपस्थिता

––(,)⏑⏑–⏑⏑–⏑–

त्जौ जो गुरुणेयमुपस्थिता॥ ९०॥

## ११ त्रिष्टुप् एकादशाक्षरा

### इन्द्रवज्रा

––⏑––⏑⏑–⏑––,

स्यादिन्द्रवज्रा यदि तौ जगौ गः॥ ९१॥

### उपेन्द्रवज्रा

⏑–⏑––⏑⏑–⏑––,

उपेन्द्रवज्रा जतजास्ततो गौ॥ ९२॥

### उपजाति

⏑–⏑––⏑⏑–⏑––,

अनन्तरोदीरितलक्ष्मभाजौ

––⏑––⏑⏑–⏑––,

पादौ यदीयावुपजातयस्ताः

––⏑––⏑⏑–⏑––,

इत्थं किलान्यास्वपि मिश्रितासु

⏑–⏑––⏑⏑–⏑––,

वदन्ति जातिष्विदमेव नाम॥ ९३॥

### सुमुखी

⏑⏑⏑⏑–(,)⏑⏑–⏑⏑–

नजजलगैर्गदिता सुमुखी॥ ९४॥

### दोधक

–⏑⏑–⏑⏑–⏑⏑––,

दोधकवृत्तमिदं भभभाद्गौ॥ ९५॥

### शालिनी

––––,–⏑––⏑––

शालिन्युक्ता म्तौ तगौ गो ऽब्धिलोकैः॥ ९६॥

### वातोर्मि

––––(,)◡◡––◡––

वातोर्मीयं कथिता म्भौ तगौ गः॥ ९७॥

### श्री

–◡◡––,◡◡◡◡––

बाणरसैः स्याद्भतनगगैः श्रिः॥ ९८॥

### भ्रमरविलसित

––––(,)◡◡◡◡◡◡–

म्भौ न्लौ गः स्याद्भ्रमरविलसितम्॥ ९९॥

### रथोद्धता

–◡–◡◡◡–◡–◡–,

रान्नराविह रथोद्धता लगौ॥ १००॥

### स्वागता

–◡–◡◡◡–◡◡––,

स्वागतेति रनभाद्गुरुयुग्मम्॥ १०१॥

### वृत्ता

◡◡◡◡(,)◡◡◡◡–––

ननसगगुरुरचिता वृत्ता॥ १०२॥

### भद्रिका

◡◡◡◡◡◡–◡–◡–,

ननरलगुरुभिश्च भद्रिका॥ १०३॥

### मौक्तिकमाला

–⏑⏑––(,)⏑⏑⏑⏑––

मौक्तिकमाला यदि भतनाद्गौ॥ १०४॥

### उपस्थिता

⏑–⏑⏑⏑–––⏑––,

उपस्थितमिदं ज्सौ ताद्गकारौ॥ १०५॥

## १२ जगती द्वादशाक्षरा

### चन्द्रवर्त्म

–⏑–⏑(,)⏑⏑–⏑⏑⏑⏑–

चन्द्रवर्त्म निगदन्ति रनभसैः॥ १०६॥

### वंशस्थ

⏑–⏑––⏑⏑–⏑–⏑–,

जतौ तु वंशस्थमुदीरतं जरौ॥ १०७॥

### इन्द्रवंशा

––⏑––⏑⏑–⏑–⏑–,

स्यादिन्द्रवंशा ततजै रसंयुतैः॥ १०८॥

### तोटक

⏑⏑–⏑⏑–⏑⏑–⏑⏑–,

इह तोटकमम्बुधिसैः प्रथितम्॥ १०९॥

### द्रुतविलम्बित

⏑⏑⏑–⏑⏑–⏑⏑–⏑–,

द्रुतविलम्बितमाह नभौ भरौ॥ ११०॥

### पुटो

⏑⏑⏑⏑⏑⏑⏑⏑––,–⏑––

वसुयुगविरतिर्नौ म्यौ पुटो ऽयम्॥ १११॥

### प्रमुदितवदना

⏑⏑⏑⏑⏑⏑–⏑––⏑–,

प्रमुदितवदना भवेन्नौ च रौ॥ ११२॥

### कुसुमविचित्रा

⏑⏑⏑⏑––(,)⏑⏑⏑⏑––,

नयसहितौ न्यौ कुसुमविचित्रा॥ ११३॥

### जलोद्धतगति

⏑–⏑⏑⏑–,⏑–⏑⏑⏑–

रसैर्जसजसा जलोद्धतगतिः॥ ११४॥

### भुजङ्गप्रयातं

⏑––⏑––⏑––⏑––,

भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः॥ ११५॥

### स्रग्विणी

–⏑––⏑––⏑––⏑–,

रैश्चतुर्भिर्युता स्रग्विणी सम्मता॥ ११६॥

### प्रियंवदा

⏑⏑⏑–⏑⏑⏑–⏑–⏑–,

भुवि भवेन्नभजरैः प्रियंवदा॥ ११७॥

### मणिमाला

––⏑⏑––,––⏑⏑––

त्यौ त्यौ मणिमाला चिन्ना गुहवक्त्रैः॥ ११८॥

### ललिता

––⏑–⏑⏑⏑–⏑–⏑–,

धीरैरभाणि ललिता तभौ जरौ॥ ११९॥

### प्रमिताक्षरा

⏑⏑–⏑–⏑⏑⏑–⏑⏑–,

प्रमिताक्षरा सजससैरुदिता॥ १२०॥

### उज्ज्वला

⏑⏑⏑⏑⏑⏑–⏑⏑–⏑–,

ननभरसहिता महितोज्ज्वला॥ १२१॥

### वैश्वदेवी

–––––,–⏑––⏑––

पञ्चाश्वैश्चिन्ना वैश्वदेवी ममौ यौ॥ १२२॥

### जलधरमाला

––––,⏑⏑⏑⏑––––

अब्ध्यष्टाभिर्जलधरमाला म्भौ स्मौ॥ १२३॥

### नवमालिका

⏑⏑⏑⏑–⏑–⏑(,)⏑⏑––

इह नवमालिका नजभयैः स्यात्॥ १२४॥

### प्रभा

⏑⏑⏑⏑⏑⏑–,⏑––⏑–

स्वरशरविरतिर्ननौ रौ प्रभा॥ १२५॥

### मालनी

⏑⏑⏑⏑–(,)⏑⏑–⏑–⏑–

भवति नजावथ मालनी जरौ॥ १२६॥

### अभिनवतामरस

⏑⏑⏑⏑–⏑⏑–⏑⏑––,

अभिनवतामरसं नजजाद्यः ॥ १२७॥

## १३ अतिजगती त्रयोदशाक्षरा

### क्षमा

⏑⏑⏑⏑⏑⏑–,–⏑––⏑–

तुरगरसयतिर्नौं ततौ गः क्षमा॥ १२८॥

### प्रहर्षिणी

–––,⏑⏑⏑⏑–⏑–⏑––

म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्॥ १२९॥

### अतिरुचिरा

⏑–⏑–,⏑⏑⏑⏑–⏑–⏑–

चतुर्ग्रहैरतिरुचिरा जभस्जगाः ॥ १३०॥

### मत्तमयूर

––––,–⏑⏑––⏑⏑––

वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम्॥ १३१॥

### मञ्जुभाषिणी

⏑⏑–⏑–⏑⏑⏑–⏑–⏑–,

सजसा जगौ भवति मञ्जुभाषिणी॥ १३२॥

## १४ शक्करी चतुर्दशाक्षरा

### असंबाधा

–––––,⏑⏑⏑⏑⏑⏑–––

म्तौ न्सौ गावक्षग्रहविरतिरसंबाधा॥ १३३॥

### अपराजिता

⏑⏑⏑⏑⏑⏑–,⏑–⏑⏑–⏑–

ननरसलघुगैः स्वरैरपराजिता॥ १३४॥

### प्रहरणकलिता

⏑⏑⏑⏑⏑⏑–(,)⏑⏑⏑⏑⏑⏑–

ननभनलगिति प्रहरणकलिता॥ १३५॥

### वसन्ततिलका

––⏑–⏑⏑⏑–⏑⏑–⏑––,

उक्ता वसन्ततिलका तभजा जगौ गः॥ १३६॥

### सिंहोन्नत

––⏑–⏑⏑⏑–⏑⏑–⏑––,

सिंहोन्नतेयमुदिता मुनिकाश्यपेन॥ १३७॥

### उद्धर्षिणी

––⏑–⏑⏑⏑–⏑⏑–⏑––,

उद्धर्षिणीयमुदिता मुनिसैतवेन॥ १३८॥

## १५ अतिशक्करी पञ्चदशाक्षरा

### शशिकला

⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑–,

द्विहतहयलघुरथ गिति शशिकला॥ १३९॥

### स्रज्

⏑⏑⏑⏑⏑⏑,⏑⏑⏑⏑⏑⏑⏑⏑–,

स्रगिति भवति रसनवकयतिरियम्॥ १४०॥

### मणिगुणनिकर

⏑⏑⏑⏑⏑⏑⏑⏑,⏑⏑⏑⏑⏑⏑–

वसुहययतिरिह मणिगुणनिकरः॥ १४१॥

### मालिनी

˘˘˘˘˘˘––,–˘––˘––

ननमयययुतेयं मालिनी भोगिलोकैः॥ १४२॥

### प्रभद्रका

˘˘˘˘–˘–˘˘˘–˘–˘–,

भवति नजौ भजौ रसहितौ प्रभद्रकम्॥ १४३॥

### एला

˘˘–˘–,˘˘˘˘˘˘˘˘––

सजना नयौ शरदशयतिरियमेला॥ १४४॥

### चन्द्रलेखा

––––˘––,––˘––˘––

म्रौ म्यौ यान्तौ भवेतां सप्ताष्टभिश्चन्द्रलेखा॥ १४५॥

## १६ अष्टिः षोडशाक्षरा

### षभगजविलसित

–˘˘–˘–˘,˘˘˘˘˘˘˘˘–

भ्रत्रिनगैः स्वरात्वमृषभगजविलसितम्॥ १४६॥

### वाणिनी

˘˘˘˘–˘–˘˘˘–˘–˘––,

नजभजरैः सदा भवति वाणिनी गयुक्तैः॥ १४७॥

## १७ अत्यष्टिः सप्तदशाक्षरा

### शिखरिणी

⏑–––––,⏑⏑⏑⏑⏑––⏑⏑⏑–

रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी॥ १४८॥

### पृथ्वी

⏑–⏑⏑⏑–⏑–,⏑⏑⏑–⏑––⏑–

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः॥ १४९॥

### वंशपत्रपतित

–⏑⏑–⏑–⏑⏑⏑–,⏑⏑⏑⏑⏑⏑–

दिङ्मुनिवंशपत्रपतितं भरनभनलगैः॥ १५०॥

### हरिणी

⏑⏑⏑⏑⏑–,––––,⏑–⏑⏑–⏑–

रसयुगहयैर्न्सौं म्रौ स्लौ गो यदा हरिणी तदा॥ १५१॥

### मन्दाक्रान्ता

––––,⏑⏑⏑⏑⏑–,–⏑––⏑––

मन्दाक्रान्ता जलधिषडगैर्म्भौं नतौ ताद्गुरू चेत्॥ १५२॥

### नर्कुटक

⏑⏑⏑⏑–⏑–,⏑⏑⏑–⏑⏑–⏑⏑–

हयदशभिर्नजौ भजजला गुरु नर्कुटकम्॥ १५३ ॥

### कोकिलक

∪∪∪∪–∪–,∪∪∪–∪∪,–∪∪–

मुनिगुहकार्णवैः कृतयती वद कोकिलकम्॥ १५४॥

## १८ धृतिः अष्टदशाक्षरा

### कुसुमितलतावेल्लिता

–––––,∪∪∪∪∪–,–∪–––∪––

स्याद्भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ॥ १५५॥

## १९ अतिधृतिः ऊनविंशत्यक्षरा

### शार्दूलविक्रीडित

–––∪∪–∪–∪∪∪–,––∪–––∪–

सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्॥ १५६॥

## २० कृतिः विंशत्यक्षरा

### सुवदना

––––∪––,∪∪∪∪∪∪–,––∪∪∪–

ज्ञेयाः सप्ताश्वषड्भिर्मरभनययुता भ्लौ गः सुवदना॥ १५७॥

### वृत्त

–∪–∪–∪–∪–∪–∪–∪–∪–∪–∪,

त्रीरजौ गलौ भवेदिहेदृशेन लक्षणेन वृत्तनाम॥ १५८॥

## २१ प्रकृतिः एकविंशत्यक्षरा

### स्रग्धरा

––––◡––,◡◡◡◡◡◡–,–◡––◡––

म्रौ भ्नौ यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयं

॥ १५९॥

## २२ आकृतिः द्वाविंशत्यक्षरा

### भद्रका

–◡◡–◡–◡◡◡–,◡–◡◡◡–◡–◡◡◡–

भ्रौ नरना रनावथ गुरुर्दिगर्कविरमं हि भद्रकमिति॥ १६०॥

## २३ विकृतिः त्रयोविंशत्यक्षरा

### अश्वललिता

◡◡◡◡–◡–◡◡◡–,◡–◡◡◡–◡–◡◡◡–

यदिह नजौ भजौ भ्जभलगास्तदश्वललितं हरार्कयतिमत् ॥ १६१॥

### मत्ताक्रीडा

––––––––,◡◡◡◡◡,◡◡◡◡◡◡◡◡◡–

मत्ताक्रीडा मौ त्नौ नौ नल्गिति भवति वसुशरदशयतियुता ॥ १६२॥

### २४ सङ्कृतिः चतुर्विंशत्यक्षरा

#### तन्वी

–⏑⏑––,⏑⏑⏑⏑⏑⏑–,–⏑⏑–⏑⏑⏑⏑⏑⏑––

भूतमुनीनैर्यतिरिह भतनाः स्भौ भनयाश्च यदि भवति तन्वी ॥ १६३॥

### २५ अतिकृतिः पञ्चविंशत्यक्षरा

#### क्रौञ्चपदा

–⏑⏑––,–⏑⏑––,⏑⏑⏑⏑⏑⏑⏑⏑,⏑⏑⏑⏑⏑⏑–

क्रौञ्चपदा भ्मौ स्भौ ननना न्गाविषुशरवसुमुनिविरतिरिह भवेत्॥ १६४॥

### २६ उत्कृतिः षड्विंशत्यक्षरा

#### भुजङ्गविजृम्भित

––––––––,⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑–,⏑–⏑⏑–⏑–

वस्वीशाश्वच्चेदोपेतं ममतनयुगनरसलगैर्भुजङ्गविजृम्भितम्॥ १६५॥

#### अपवाह

–––⏑⏑⏑⏑⏑⏑,⏑⏑⏑⏑⏑⏑,⏑⏑⏑⏑⏑⏑,⏑⏑–––

मो नाःषट् सगगिति यदि नवरसरसशरयतियुतमपवाहाख्यम् ॥ १६६॥

### २७ अथ दण्डकाः

#### चण्डवृष्टिप्रयात

⏑⏑⏑⏑⏑⏑–⏑––⏑––⏑––⏑––⏑––⏑––⏑–,

यदिह नयुगलं ततः सप्तरेफास्तदा चण्डवृष्टिप्रयातो भवेद्दण्डकः॥ १६७॥

### अर्ण

◡◡◡◡◡◡–◡––◡––◡––◡––◡––◡––◡––◡–,

प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशंख्यादयः॥ १६८॥

### प्रचितक

◡◡◡◡◡◡◡––◡––◡––◡––◡––◡––◡––,

प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्वयादुत्तरैः सप्तभिर्यैः॥ १६९॥

*इति वृत्तरत्नाराख्ये चन्दसि वर्णवृत्तकथनं नाम तृतीयो ऽध्यायः*

# चतुर्थो ऽध्यायः अर्धसमवृत्त

### उपचित्रा

◡◡–◡◡–◡◡–◡–¦¦–◡◡–◡◡–◡◡––

विषमे यदि सौ सलगा दलेभौ युजि भाद्गुरुकावुपचित्रम् ॥ १७० ॥

### द्रुतमध्या

–◡◡–◡◡¦–◡◡––¦¦◡◡◡◡–◡◡¦–◡◡––

भत्रयमोजगतं गुरुणी चेद्युजि च नजौ ज्ययुतौ द्रुतमध्या ॥ १७१ ॥

### वेगवती

◡◡–◡◡¦–◡◡––¦¦–◡◡–◡◡¦–◡◡––

सयुगात्सगुरू विषमे चेद्भाविह वेगवती युजि भाद्गौ॥ १७२ ॥

### भद्रविराड्

––◡◡¦–◡–◡––¦¦–––◡◡¦–◡–◡––

ओजे तपरौ जरौ गुरुश्चेन्म्सौ ज्गौग्भद्रविराड्भवेद्नोजे॥ १७३ ॥

### केतुमती

◡◡–◡–◡◡◡––¦¦–◡◡–◡–◡◡◡––

असमे सजौ सगुरुयुक्तौकेतुमती समे भरनगाद्गः॥ १७४ ॥

### आख्यानकी

––◡––◡◡–◡––¦¦◡–◡––◡◡–◡––

आख्यानकी तौ जगुरू ग ओजेजतावनोजे जगुरू गुरुश्चेत्॥ १७५ ॥

### विपरीताख्यानकी

ᴗ–ᴗ––ᴗᴗ–ᴗ––¦¦––ᴗ––ᴗᴗ–ᴗ––

जतौ जगौ गो विषमे समे चेत्तौ ज्गौ ग एषा विपरीतपूर्वा ॥ १७६॥

### हरिणप्लुता

ᴗᴗ–ᴗᴗ–ᴗᴗ–ᴗ–¦¦ᴗᴗᴗ–ᴗᴗ–ᴗᴗ–ᴗ–

सयुगात्सलघू विषमे गुरुर्युजि नभौ भरकौ हरिणप्लुता ॥ १७७॥

### अपरवक्त्र

ᴗᴗᴗᴗᴗᴗ¦–ᴗ–ᴗ–¦¦ᴗᴗᴗᴗ–ᴗᴗ¦–ᴗ–ᴗ–

अयुजि ननरला गुरुः समेन्जमपरवक्त्रमिदं ततो जरौ ॥ १७८॥

### पुष्पिताग्रा

ᴗᴗᴗᴗᴗᴗ¦–ᴗ–ᴗ––¦¦ᴗᴗᴗᴗ–ᴗᴗ¦–ᴗ–ᴗ––

अयुजि नयुगरेफतो यकारोयुजि च नजौ जरगाश्च पुष्पिताग्रा॥ १७९॥

ᴗ–ᴗᴗ¦ᴗ–––¦¦––––¦ᴗ–ᴗ–

वदन्त्यपरवक्त्राख्यंवैतालीयं विपश्चितः।

ᴗᴗ––¦ᴗ––ᴗ¦¦–––ᴗ¦ᴗ–ᴗ–

पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं तथा॥ १८०॥

### यवमती

–ᴗ–ᴗ–ᴗ–ᴗ–ᴗ–ᴗ¦¦ᴗ–ᴗ–ᴗ–ᴗ–ᴗ–ᴗ––

स्यादयुग्मके रजौ रजौ समे तुजरौ जरौ गुरुर्यवात्परा मतीयम्॥ १८१॥

*इति वृत्तरत्नाराख्ये चन्दःशास्त्रे र्धसमवर्णवृत्तकथनं नाम*

# पञ्चमो ऽध्यायः विषमवृत्त

## पदचतुरूर्ध्व

⏑⏑–––⏑––– ८ अक्षरा

मुखपादो ऽष्टभिर्वर्णैः।

⏑–––⏑⏑–⏑–⏑––– १२ अक्षरा

परे स्युर्मकरालयैः क्रमाद्वृद्धैः।

⏑⏑–––⏑⏑–––––––⏑––– १६ अक्षरा

सततं यस्य विचित्रैः पादैः सम्पन्नसौन्दर्यम्।

⏑⏑⏑⏑⏑⏑⏑⏑⏑–⏑⏑⏑⏑–––⏑––– २० अक्षरा

तदुदितममलमतिभिः पदचतुरूर्ध्वाभिधं वृत्तम् ॥ १८२॥

## आपीड

⏑⏑⏑⏑⏑⏑–– ८ अक्षरा

प्रथममुदितवृत्ते।

⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑–– १२ अक्षरा

विरचितविषमचरणभाजि।

⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑–– १६ अक्षरा

गुरुकयुगलनिधन इह सहित आङ्ग।

⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑–– २० अक्षरा

लघुविरचितपदविवृतियतिरिति भवति पीडः॥ १८३॥

## कलिका

˘˘˘˘˘˘˘˘˘˘–– १२ अक्षरा

प्रथममितरचरणसमुत्थं।

˘˘˘˘˘˘–– ८ अक्षरा

श्रयति स यदि लक्ष्म।

˘˘˘˘˘˘˘˘˘˘˘˘˘˘–– १६ अक्षरा

इतरदितरगदितमपि यदि च तुर्यं।

˘˘˘˘˘˘˘˘˘˘˘˘˘˘˘˘˘˘–– २० अक्षरा

चरणयुगलकमविकृतमपरमिति कलिका सा ॥ १८४॥

## लवली

˘˘˘˘˘˘˘˘˘˘–– १२ अक्षरा

द्विगुरुयुतसकलचरणान्ता।

˘˘˘˘˘˘˘˘˘˘˘˘˘˘–– १६ अक्षरा

सुखचरणगतमनुभवति च तृतीयम्।

˘˘˘˘˘˘–– ८ अक्षरा

चरणमिह हि लक्ष्म।

˘˘˘˘˘˘˘˘˘˘˘˘˘˘˘˘˘˘–– २० अक्षरा

प्रकृतमखिलमपि यदिदमनुभवति लवली सा॥ १८५॥

### अमृतधारा

⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑–– १२ अक्षरा

प्रथममधिवसति यदि तुर्यं।

⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑–– १६ अक्षरा

चरमचरणपदमवसितगुरुयुग्मम्।

⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑–– २० अक्षरा

अखिलमपरमुपरिगतमिति ललितपदयुक्ता।

⏑⏑⏑⏑⏑⏑–– ८ अक्षरा

तदियममृतधारा॥ १८६॥

*इति पदचतुरूर्ध्वप्रकरणम्*

### उद्गता

⏑⏑–⏑–⏑⏑⏑–⏑

सजमादिमे सलघुकौ च।

⏑⏑⏑⏑⏑–⏑–⏑–

नसजगुरुकैरथोद्गता।

–⏑⏑⏑⏑⏑⏑–⏑⏑–

त्र्यङ्घ्रिगतभनजला गयुताः।

⏑⏑–⏑–⏑⏑⏑–⏑–⏑–

सजसा जगौ चरणमेकतः पठत्॥ १८७॥

### सौरभक

⏑⏑–⏑–⏑⏑⏑––

चरणत्रयं व्रजति लक्ष्म।

⏑⏑⏑⏑⏑–⏑–⏑–

यदि सकलमुद्गतागतम्।

–⏑–⏑⏑⏑–⏑⏑–

नौं भगौ भवति सौरभकं।

⏑⏑–⏑–⏑⏑⏑–⏑–⏑–

चरणे यदीह भवतस्तृतीयके॥ १८८॥

### ललिता

⏑⏑–⏑–⏑⏑⏑––

नयुगं सकारयुगलं च।

⏑⏑⏑⏑⏑–⏑–⏑–

भवति चरणे तृतीयके।

⏑⏑⏑⏑⏑⏑⏑⏑–⏑⏑–

तदुदितमुरुमतिभिर्ललितं।

⏑⏑–⏑–⏑⏑⏑–⏑–⏑–

यदि शेषमस्य खलु पूर्वतुल्यकम्॥ १८९॥

*इत्युद्गताप्रकरणम्*

### उपस्थितप्रचुपित

–––⏑⏑–⏑–⏑–⏑⏑––

म्सौ ज्भौ गौ प्रथमाङ्घ्रिरेकतः पृथगन्यन्।

⏑⏑–⏑⏑⏑⏑–⏑–⏑––

त्रितयं सनजरगास्ततो ननौ सः।

⏑⏑⏑⏑⏑⏑⏑⏑⏑–

त्रिनपरिकलितजयौ।

⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑–⏑⏑––

प्रचुपितमिदमुदितमुपस्थितपूर्वम्॥ १९०॥

### वर्धमान

–––⏑⏑–⏑–⏑–⏑⏑––

नौ पादे ऽथ तृतीयके सनौ नसयुक्तौ।

⏑⏑–⏑⏑⏑⏑–⏑–⏑⏑––

प्रथमाङ्किकृतयतिस्तु वर्धमानम्।

⏑⏑⏑⏑⏑⏑⏑⏑–⏑⏑⏑⏑⏑⏑⏑⏑⏑–

त्रितयमपरमपि पूर्वसदृशमिह भवति।

⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑–⏑⏑––

प्रततमतिभिरिति गदितं लघु वृत्तम्॥ १९१॥

### शुद्धविराडार्षभ

–––⏑⏑–⏑–⏑–⏑⏑––

अस्मिन्नेव तृतीयके यदा तजराः स्युः।

⏑⏑–⏑⏑⏑⏑–⏑–⏑⏑––

प्रथमे च विरतिरार्षभं ब्रुवन्ति।

––⏑⏑–⏑–⏑–

तच्चुद्धविराट् पुरः स्थितं।

⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑–⏑⏑––

त्रितयमपरमपि यदि पूर्वसमं स्यात्॥ १९२॥

इत्युपस्थतप्रचुपितप्रकरणम्

⏑⏑–⏑⏑–––
विषमाक्षरपादं वा
––⏑⏑–⏑⏑–⏑–
पादैरसमं दशधर्मवत्।
––––⏑––
यच्चन्दो नोक्तमत्र
––⏑––⏑–––
गाथेति तत्सूरिभिः प्रोक्तम्॥ १९३॥

*इति वृत्तरत्नाराख्ये चन्दसि विषमवृत्तकथनं नाम पञ्चमो ऽध्यायः*

## षष्ठो ऽध्यायः प्रस्थारादि

––––¦⏑––⏑¦¦–––⏑¦⏑–⏑–

प्रस्थारो नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया।

––⏑–¦⏑––⏑¦¦⏑–––¦⏑–⏑–

संख्यानमध्वयोगश्चषडेते प्रत्ययाः स्मृताः॥ १९४॥

–––⏑¦⏑–––¦¦⏑––⏑¦⏑–⏑–

पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः।

⏑–⏑⏑¦⏑–––¦¦––––¦⏑–⏑–

यथोपरि तथा शेषंभूयः कुर्यादमुं विधिम्॥ १९५॥

––––¦⏑––⏑¦¦–––⏑¦⏑–⏑–

ऊने दद्याद्गुरूनेवयावत्सर्वलघुर्भवेत्।

––––¦⏑–––¦¦––⏑⏑¦⏑–⏑–

प्रस्तारो ऽयं समाख्यातश्चन्दोविचितिवेदिभिः॥ १९६॥

––⏑–¦⏑–––¦¦––––¦⏑–⏑–

नष्टस्य यो भवेदङ्कस्तस्यार्धे ऽर्धे समे च लः।

⏑⏑––¦⏑–––¦¦––––¦⏑–⏑–

विषमे चैकमाधायस्यादर्धे ऽर्धे गुरुर्भवेत्॥ १९७॥

–––⏑¦⏑–––¦¦⏑–––¦⏑–⏑–

उद्दिष्टं द्विगुणानाद्यादुपर्यङ्कान्समालिखेत्।

⏑–––¦⏑––––||––––¦⏑–⏑–

लघुस्था ये च तत्राङ्कास्तैः सैकैर्मिश्रितैर्भवेत्॥ १९८॥

–––⏑¦⏑––––||–⏑––¦⏑–⏑–

वर्णान्वृत्तभवान्सैकानौत्तराधर्यतः स्थितात्।

–––⏑¦⏑––––||⏑–⏑⏑¦⏑–⏑–

एकादिक्रमतश्चैतानुपर्युपरि निक्षिपेत्॥ १९९॥

⏑–⏑–¦⏑––––||⏑–––¦⏑–⏑–

उपान्त्यतो निवर्तेतत्यजन्नेकैकमूर्ध्वतः।

⏑–––¦⏑–––⏑||–––⏑¦⏑–⏑–

उपर्याद्याद्गुरोरेकगेकद्यादिलगक्रिया॥ २००॥

⏑–⏑–¦⏑––––||⏑–––¦⏑–⏑–

लगक्रियाङ्कसन्दोहेभवेत्संख्या विमिश्रिते।

–––⏑¦⏑––––||–––⏑¦⏑–⏑–

उद्दिष्टांकसमाहारःसैको वा जनयेदिमाम्॥ २०१॥

–––⏑¦⏑––––||–⏑––¦⏑–⏑–

संख्यैव द्विगुणैकोनासद्भिरध्वा प्रकीर्तितः।

–––⏑¦⏑–––⏑||⏑–––¦⏑–⏑–

वृत्तस्याङ्गुलिकी व्याप्तिरधः कुर्यात्तथाङ्गुलिम्॥ २०२॥

––––⏑––,⏑⏑⏑⏑⏑⏑–,–⏑––⏑––

वंशे ऽभूत्कश्यपस्य प्रकटगुणगणः शैवसिद्धान्तवेत्ता।

––––⏑––,⏑⏑⏑⏑⏑⏑–,–⏑––⏑––

विप्रः पव्येकनामा विमलतरमतिर्वेदतत्त्वार्थबोधे।

––––⏑––,⏑⏑⏑⏑⏑⏑––––⏑––

केदारस्तस्य सूनुः शिवचरणयुगाराधनैकाग्रचित्तः।

––––⏑––,⏑⏑⏑⏑⏑⏑–,–⏑––⏑––

चन्दस्तेनाभिरामं प्रविरचितमिदं वृत्तरत्नाकराख्यम्॥ २०३॥

*इति वृत्तरत्नाराख्ये चन्दसि प्रस्थारादिकथनं नाम षष्ठो ऽध्यायः*

*समाप्तश्चायं वृत्तरत्नाकरः*